દિ. ૨૧-૪-૨૦ ઉપશાસ્ત્રી પ્રથમ વર્ષ, વિષય વ્યાકરણ

ગ્રન્થ-સિદ્ધાન્તકૌમુદી (પ્રાગિવીય પ્રકરણમ્)

1 ભૂમા — બહોર્ભાવઃ ઇત્યર્થે પૃથ્વાદિભ્ય ઇમનિચ્વા ઇતિ સૂત્રેણ ઇમનિચ્ પ્રત્યયે અનુબન્ધલોપે । ~~બહો~~ બહોર્લોપો ભૂ ચ બહોઃ ઇતિ સૂત્રેણ ઇમનિચ્ પ્રત્યયસ્ય ઇકારલોપે તથા બહુ સ્થાને ભૂ આદેશે કૃતે ભૂમન્ ઇતિ જાતે । તદ્ધિતત્વાત્ પ્રાતિપદિકસંજ્ઞાયાં ~~સર્વનામસ્થ~~ સર્વનામસ્થાને ચાસમ્બુદ્ધૌ ઇતિ ઉપધાદીર્ઘે સુલોપે નલોપે કૃતે ભૂમા ઇતિ સિદ્ધમ્ ।

2 ભૂયાન્ — બહુત્વઃ ~~ઇત્યર્થે~~ અયમનયોરતિશયેન બહુઃ ઇત્યર્થે દ્વિવચને વિભજ્યોપપદે તરબ્ ઈયસુનૌ ઇતિ સૂત્રેણ ઈયસુન્ પ્રત્યય અનુબન્ધલોપે । બહોર્લોપો ભૂ ચ બહોઃ ઇતિ સૂત્રેણ ઈયસુન્ પ્રત્યયસ્ય ઈકારલોપે તથા બહુ સ્થાને ભૂ આદેશે કૃતે, ભૂયસ્ ઇતિ જાતે, તદ્ધિતત્વાત્ પ્રાતિપદિકસંજ્ઞાયાં, ઉગિત્વાત્ ઉગિદચાં સર્વનામસ્થાને ઽધાતોઃ ઇતિ સૂત્રેણ નુમ્ આગમે અનુબન્ધલોપે ઉપધાદીર્ઘે, સુલોપે સંયોગાન્તલોપે ભૂયાન્ ઇતિ સિદ્ધમ્ ।

3 ભૂયિષ્ઠઃ — અયમેષાં બહુઃ ઇત્યર્થે અતિશાયને તમબ્ ~~ઇષ્ઠનૌ~~ ઇષ્ઠનૌ ઇતિ સૂત્રેણ ઇષ્ઠન્ પ્રત્યયે અનુબન્ધલોપે । બહોર્લોપો ભૂ ચ બહોઃ ઇતિ સૂત્રેણ ઇષ્ઠન્ પ્રત્યયસ્ય ઇકારલોપે તથા બહુ સ્થાને ભૂ આદેશે કૃતે ઇષ્ઠસ્ય યિટ્ ચ ઇતિ સૂત્રેણ ઇકારલોપે યિટ્ આગમે ભૂયિષ્ઠઃ ઇતિ સિદ્ધમ્ ।

અમરનાથમિશ્ર
એસો. પ્રો. વ્યાક૦
શ્રી ઉ. સં. મ. વિ.

दि॰ २१-८-२०

उपशास्त्री द्वितीयवर्ष, विषय व्याकरण

ग्रन्थ- सिद्धान्त कौमुदी (अदादि प्रकरणम्)

१ अद्धि — अद् धातोर्लोट् लोट्स्थाने तिप्तसझि इति सूत्रेण सिप् प्रत्यये, अनुबन्ध लोपे। तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायां, कर्तरि शप् इति सूत्रेण शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति सूत्रेण शपो लुकि अद् सि इति दशायां सेर्ह्यपिच्च इति सूत्रेण सिप् स्थाने हि आदेशे हुझल्भ्यो हेर्धिः इति सूत्रेण हि स्थाने धि आदेशे कृते अद्धि इति सिद्धम्।

२ आदत् — अद् धातोः लङ् लङ्स्थाने तिप्तसझि इति सूत्रेण तिप् प्रत्यये अनुबन्ध लोपे तिङ्शित् सार्वधातुकम् इ सूत्रे॰ सार्वधातुक संज्ञायाम् कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शः इति शपो लुक, इतश्च इति इकार लोपे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे अनुबन्ध लोपे। अत आदेः इति सूत्रे पररूप प्रबाध्य दीर्घे, अदः सर्वेषाम् इति सूत्रेण अडागमे आदत् इति सिद्धम्।

३ अघसत् — अद् धातोर्लुङ् लुङ् स्थाने तिप्तसझि इति सूत्रेण तिप् प्रत्यये, अनुबन्ध लोपे। इतश्च इति सूत्रेण इकार लोपे। लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे अ अद् त इति जाते। लुङ्सनोर्घस्लृ इति सूत्रेण अद् स्थाने घस्लृ आदेशे च्लि लुङि इति सूत्रेण च्लि प्रत्यये, पुषादिद्युताद्यॢदितः परस्मैपदेषु इति सूत्रेण च्लेः अङ् अनुबन्ध लोपे अघसत् इति सिद्धम्।

अमरनाथ मिश्र
स्ना॰ प्रा॰ व्याकरण
रा॰ उ॰ सं॰ म॰ वि॰
[illegible]

दि० २१-४-२० शास्त्री द्वितीय खण्ड, विषय- अनिवार्य दर्शन
ग्रन्थ- तर्कसंग्रह

प्र०१ बाधितस्य हेत्वाभासस्य किं लक्षणम्, किञ्च तदुदाहरणम्

उत्तर प्रत्यक्षादिप्रमाणान्तरैः निर्णीतसाध्याभाववत्त्वं ~~हेत्वाभासि~~ हेतोर्बाधितत्वम्। यथा वह्निरनुष्णो द्रव्यत्वादित्यत्रानुष्णत्वरूपस्य साध्यस्याभावः उष्णत्वं स्पर्शनेन्द्रियेणैव वह्नौ गृह्यते इति द्रव्यत्वरूपो हेतुर्बाधित इत्युच्यते। अत्र स हेतुर्बाधाय प्रमाणान्तरेति, यस्यादि बाधाय साध्याभावेति।

प्र०२ उपमानस्य किं लक्षणम्, कः उपमितिपदार्थः

उत्तर उपमितिकरणत्वम् उपमानत्वम्। संज्ञासंज्ञिसम्बन्धज्ञानम् उपमितिः। पदपदार्थसम्बन्धात्मकशक्तिज्ञानमुपमितिरिति यावत्। तादृशोपमितिकरणं सादृश्यज्ञानम् उपमानपदार्थः। तथाहि कश्चिन्नागरिको गवयशब्दस्यार्थमजानन् तं जिज्ञासमानः कश्चिदारण्यकपुरुषात् गोसदृशो गवय इत्यतिदेशवाक्यं श्रुत्वा वनं प्राप्तो निरूपितातिदेशवाक्यस्यार्थस्मरणं गोसदृशं मांसपिण्डं पश्यति तदनन्तरञ्च तस्य असौ गवयपदवाच्यः इत्युपमितिर्भवति। अत्र च गोसदृशो गवयपदवाच्यः इत्याकारकवाक्यार्थज्ञानं जायते तदुपमितिकरणतया उपमानमित्युच्यते तत्र च अतिदेशवाक्यार्थस्मरणं व्यापारः। असौ गवयपदवाच्यः इति ज्ञानञ्च उपमितिरित्युच्यते।

अमरनाथ मिश्र
एसो० प्रो०
व्याकरण
रा० उ० सं० म०
सरखेना पुरनिया